# प्रथमः पाठः

## आश्रमः



अस्माकं प्रदेशस्य सीतापुरजनपदे नैमिषारण्यं प्राचीनं तीर्थस्थलम् अस्ति। तत्र एकस्मिन् आश्रमे ऋषयः मुनयः गुरवः कवयः छात्राश्च निवसन्ति स्म। आश्रमस्य विशाले परिसरे अश्वत्थ.वट.निम्बाशोक.वृक्षाणां गहना छाया भवति स्म। तत्र फलशालिनः आम्रामलक.पनस.पेरुवृक्षाः अपि विपुलाः आसन्। एभिः वृक्षैः तत्र पर्यावरणं शुद्धमासीत्ए येन शीतलाः वायवः मन्दं.मन्दं वहन्ति स्मए काले.काले च मेघः वर्षति स्म। इदानीमपि तस्मिन् आश्रमे धेनवः बलीवर्दाः अश्वाः अन्ये च पशवः स्वच्छन्दं चरन्ति। वृक्षेषु कपीनां कूर्दनम्ए चटकानां कूजनम्ए मयूराणां नर्तनम् च दर्शकेभ्यः आनन्दं ददति।तस्याश्रमस्य समीपे गोमती नद ीप्रवहति। तस्याः निर्मलं जलं सर्वे आश्रमवासिनः पिबन्ति स्म। आश्रमे पशवः पक्षिणश्च विरोधं विहाय एकस्मिन् घट्टे पानीयम् पिबन्ति स्मए एकत्र वसन्ति स्मए तत्रैव खादन्ति स्म च। आश्रमे छात्राणां कृते एते नियमाः आसन्.प्रातः सूर्योदयात् पूर्वम् उत्थातव्यम्ए नद्यां स्नानं कर्तव्यम्ए सन्ध्यावन्दनं करणीयम्ए ईश्वरः नमनीयः सहैव खादनीयं ततः पठनाय कक्षायां गन्तव्यम्। एतान् आश्रमनियमान् सर्वे छात्राः पालनं कुर्वन्तः आसन्।सम्प्रत्यपि आश्रमोऽयं छात्रेभ्यः श्रेष्ठं संस्कारं प्रयच्छति। तत्र जातिगतं भेदभावं

विना सर्वे निवसन्ति। स्वास्थ्य.संवर्धनाय व्यायामस्यए योगस्य प्राकृतिकचिकित्सायाश्च शिक्षणं प्रचलति। स च आश्रमः त्यागं तपस्यां परोपकारम् उदारतां च शिक्षयति।

## शब्दार्थ

**पुराकाले** त्र प्राचीन काल में। **अश्वत्थः** त्र पीपल। **नीम्ब** त्र नीम। **विहाय** त्र त्यागकर। **आमलकः** त्र आँवला**।** **पनसः** त्र कटहल। **पेरु** त्र अमरूद। **बलीवर्द** त्र बैल। **कूर्दनम्** त्र कूदना। **चटकानाम्** चिड़ियों का। **विहाय** त्र छोड़कर। **सम्प्रत्यपि** ;सम्प्रति+अपि = इस समय भी।

## अभ्यासः

### 1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

नैमिषारण्यम् ,अश्वत्थम् , पक्षिणश्च ,चिकित्सायाश्च ,प्रयच्छति ,उत्थातव्यम्, सम्प्रत्यपि ,आम्रामलकम्

### 2. एकपदेन उत्तरत -

(क) आश्रमस्य समीपे का नदीप्रवहति ?

(ख) काले-काले कः वर्षति स्म ?

(ग) वृक्षेषु कस्य कूर्दनम् आनन्दं ददाति ?

(घ) आश्रमे भेदभावं विना के निवसन्ति ?

### 3. प्रश्नानाम् उत्तराणि लिखत -

(क) आश्रमे स्वच्छन्दं के के विचरन्ति ?

(ख) स्वास्थ्यसंवर्धनाय आश्रमे किं किं भवति ?

(ग) छात्राणां कृते आश्रमे के के नियमाः आसन् ?

(घ) आश्रमः किं किं शिक्षयति ?

**4. उचितं मेलनं कृत्वा लिखत -**

| | |
|---|---|
| ’-सूर्योदयात् पूर्वम् | खादनीयम् |
| स्नानम् | गन्तव्यम् |
| सहैव | उत्थातव्यम् |
| पठनाय कक्षायाम् | कर्तव्यम् |

**5. अधोलिखित.पदानां सन्धि-विच्छेदं कुरुत -**

यथा- विरोधं विहाय = विरोधम् + विहाय

प्राचीनं तीर्थस्थलम् = ..................... +........................

पक्षिणश्च = ....................+.......................

छात्राश्च = .....................+.......................

**6. उदाहरणानुसारं पदरचनां कुरुत -**

यथा- अपश्यत् - पश्यति स्म।

अलिखत् - .......................

अपिबत् - .......................

अगच्छत् - .......................

**7. विचिन्त्य उत्तराणि लिखत -**

(क) फलदायकानां पञ्च वृक्षाणां नामानि लिखत।

(ख) अनुस्वारसन्धियुक्तानि पञ्च वाक्यानि लिखत।

(ग) जीवने वृक्षाणाम् उपयोगं लिखत।

**ध्यातव्यम्- स्म इत्यस्य प्रयोगः-**

*यदा वर्तमान-कालिकैः धातुभिः सह 'स्म' इत्यस्य प्रयोगः भवति तदा ते धातवः भूतकालिक-क्रियाणाम् अर्थान् प्रकटयन्ति।*

यथा-पठति स्म = पढ़ता था।

गच्छति स्म = जाता था।

वसन्ति स्म = रहते थे।

खादतः स्म = वे दोनों खाते थे।

## वदतु संस्कृतम्

नमस्कारः = नमस्कार।

नमस्ते/नमो नमः = नमस्ते।

हरिः ओम् = हॅलो।

श्रीमन्/मान्ये = सर/मैडम। (सम्बोधन)

धन्यवादाः = धन्यवाद।

स्वागतम् = स्वागत।

क्षमां करोतु/क्षम्यताम् = क्षमा कीजिए।

नास्ति चिन्ता = कोई बात नहीं।

कृपया = कृपया।

आम् = हाँ।

न/नहि = नहीं।

उत्तमम्/अत्युत्तमम् = अच्छा/बहुत अच्छा।

हार्दिक्यः शुभकामनाः = हार्दिक शुभकामनाएँ।

अभिनन्दनम् = अभिनन्दन।

पुनः मिलामः = फिर मिलेंगे।

विशेष-एवमेव बालकेषु परस्परं वार्तालापस्य प्रवृत्तेः विकासं कारयत।

**शिक्षण-सङ्केतः**

-गुरुकुल-शिक्षापद्धति-विषये आश्रमीयजीवनविषये च चर्चां कारयत।